# || श्रीदक्षिणामूर्ति अष्टोत्तरशतनाम स्तोत्रम् ||

www.kamakotimandali.com

ॐ विद्यारूपी महायोगी शुद्धज्ञानी पिनाकधृक् |
रत्नालङ्कृतसर्वाङ्गी रत्नमौळिर्जटाधरः ||
गङ्गाधार्यचलावासी महाज्ञानी समाधिकृत् |
अप्रमेयो योगनिधिस्तारको भक्तवत्सलः ||
ब्रह्मरूपी जगद्व्यापी विष्णुमूर्तिः पुरातनः |
उक्षवाहश्चर्मवासाः पीताम्बरविभूषणः ||
मोक्षदायी मोक्षनिधिश्चान्धकारी जगत्पतिः |
विद्याधारी शुक्लतनुः विद्यादायी गणाधिपः ||
प्रौढापस्मृतिसंहर्ता शशिमौळिर्महास्वनः |
सामप्रियोऽव्ययः साधुः सर्ववेदैरलङ्कृतः ||
हस्ते वह्निधरः श्रीमान् मृगधारी वशङ्करः |
यज्ञनाथः क्रतुध्वंसी यज्ञभोक्ता यमान्तकः ||
भक्तानुग्रहमूर्तिश्च भक्तसेव्यो वृषध्वजः |
भस्मोद्धूलितसर्वाङ्गः चाक्षमालाधरो महान् ||
त्रयीमूर्तिः परंब्रह्म नागराजैरलङ्कृतः |
शान्तरूपो महाज्ञानी सर्वलोकविभूषणः ||
अर्धनारीश्वरो देवो मुनिसेव्यः सुरोत्तमः |
व्याख्यानदेवो भगवान् रविचन्द्राग्निलोचनः ||
जगद्गुरुर्महादेवो महानन्दपरायणः |
जटाधारी महायोगी ज्ञानमाल्यैरलङ्कृतः ||

व्योमगङ्गाजलस्थानः विशुद्धो यतिरूर्जितः |
तत्त्वमूर्तिः महामन्त्री महासारस्वतप्रदः ||
व्योममूर्तिश्च भक्तानामिष्टकामफलप्रदः |
परमूर्तिः चित्स्वरूपी तेजोमूर्तिरनामयः ||
वेदवेदाङ्गतत्त्वज्ञः चतुःषष्टिकलानिधिः |
भवरोगभयध्वंसी भक्तानामभयप्रदः ||
नीलग्रीवो ललाटाक्षो गजचर्मा गतिप्रदः |
अरागी कामदश्चाथ तपस्वी विष्णुवल्लभः ||
ब्रह्मचारी च सन्न्यासी गृहस्थाश्रमकारणः |
दान्तः शमवतां श्रेष्ठो सत्यरूपो दयापरः ||
योगपट्टाभिरामश्च वीणाधारी विचेतनः |
मतिप्रज्ञासुधाधारी मुद्रापुस्तकधारणः ||
वेतालादिपिशाचौघराक्षसौघविनाशनः |
राजयक्ष्मादि रोगाणां विनिहन्ता सुरेश्वरः ||

|| इति शिवम् ||

## || śrīdakṣiṇāmūrti aṣṭottaraśatanāma stotram ||

OM vidyārūpī mahāyogī śuddhajñānī pinākadhṛk |
ratnālaṅkṛtasarvāṅgī ratnamauḻirjaṭādharaḥ ||

gaṅgādhāryacalāvāsī mahājñānī samādhikṛt |
aprameyo yoganidhistārako bhaktavatsalaḥ ||
brahmarūpī jagadvyāpī viṣṇumūrtiḥ purātanaḥ
|
ukṣavāhaścarmavāsāḥ pītāmbaravibhūṣaṇaḥ ||
mokṣadāyī mokṣanidhiścāndhakārī jagatpatiḥ
|
vidyādhārī śuklatanuḥ vidyādāyī gaṇādhipaḥ
||
prauḍhāpasmṛtisaṃhartā śaśimauḻirmahāsvanaḥ
|
sāmapriyo.avyayaḥ sādhuḥ
sarvavedairalaṅkṛtaḥ ||
haste vahnidharaḥ śrīmān mṛgadhārī
vaśaṅkaraḥ |
yajñanāthaḥ kratudhvaṃsī yajñabhoktā
yamāntakaḥ ||
bhaktānugrahamūrtiśca bhaktasevyo
vṛṣadhvajaḥ |
bhasmoddhūlitasarvāṅgaḥ cākṣamālādharo
mahān ||
trayīmūrtiḥ paraṃbrahma nāgarājairalaṅkṛtaḥ
|
śāntarūpo mahājñānī sarvalokavibhūṣaṇaḥ ||
ardhanārīśvaro devo munisevyaḥ surottamaḥ |
vyākhyānadevo bhagavān ravicandrāgnilocanaḥ
||
jagadgururmahādevo mahānandaparāyaṇaḥ |
jaṭādhārī mahāyogī jñānamālyairalaṅkṛtaḥ ||

vyomagaṅgājalasthānaḥ viśuddho yatirūrjitaḥ |
tattvamūrtiḥ mahāmantrī mahāsārasvatapradaḥ ||
vyomamūrtiśca bhaktānāmiṣṭakāmaphalapradaḥ |
paramūrtiḥ citsvarūpī tejomūrtiranāmayaḥ ||
vedavedāṅgatattvajñaḥ catuḥṣaṣṭikalānidhiḥ |
bhavarogabhayadhvaṃsī bhaktānāmabhayapradaḥ ||
nīlagrīvo lalāṭākṣo gajacarmā gatipradaḥ |
arāgī kāmadaścātha tapasvī viṣṇuvallabhaḥ ||
brahmacārī ca sannyāsī gṛhasthāśramakāraṇaḥ |
dāntaḥ śamavatāṃ śreṣṭho satyarūpo dayāparaḥ ||
yogapaṭṭābhirāmaśca vīṇādhārī vicetanaḥ |
matiprajñāsudhādhārī mudrāpustakadhāraṇaḥ ||
vetālādipiśācaugharākṣasaughavināśanaḥ |
rājayakṣmādi rogāṇāṃ vinihantā sureśvaraḥ ||

|| iti śivam ||

www.kamakotimandali.com